प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च ॥"
इति मानवे १० अध्यायः ॥
सत्प्रतिपक्षः, पुं,(सन् प्रतिपक्षः ।) तुल्यव्यक्तिः । प्रतियोगी । न्यायमते । साध्याभावव्याप्यवत् पक्षः । यथा । ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभाववाप्यवद्ध्रदादिः । इति सत्प्रतिपक्षग्रन्थः । तल्लक्षणं यथा । साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिबद्धकार्य्यसिद्धिकत्वं तत्त्वं बलञ्च व्याप्तिपक्षधर्म्मतो विरोधिबोधकान्यममकतीपयिकरूपसम्पत्तिमत्तया ज्ञायमानेन प्रतिरुद्धकार्य्यत्वं वा तत्त्वम् । इति गङ्गेशोपाध्यायकृततत्त्वचिन्तामणिः ॥
सत्फलः, पुं, (सत् फलं यस्य ।) दाड़िमवृक्षः । इति शब्दचन्द्रिका ॥ शोभनफलवद्वृक्ष ॥
सत्यं, क्ली,(सते हितम् । सत् + यत् ।) कृतयुगम् । शपथः । यथार्थम् । (यथा, रघुः । १२ । ७५ ।
"कामं जीवति मे नाथ इति सा विजहौ शुचम् ।
प्राङ्मत्वा सत्यमस्यान्तं जीवितास्मीति लज्जिता ॥")
तद्वति, त्रि । इति मेदिनी ॥ (यथा, याज्ञवल्क्ये । ३ । १४९ ।
"महाभूतानि सत्यानि यथात्मापि तथैव हि ॥")
सिद्धान्तः । इति शब्दरत्नावली ॥*॥ यथार्थस्य पर्य्यायः । तथ्यम् २ ऋतम् ३ सम्यक् ४ । इत्यमरः ॥ अवितथम् ५ भूतम् ६ । इति जटाधरः ॥ तल्लक्षणम् । यथा,—
"यथार्थकथनं यच्च सर्व्वलोकसुखप्रदम् ।
तत् सत्यमिति विज्ञेयमसत्यं तद्विपर्य्ययम् ॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥*॥
तदाकारा यथा,—
"सत्यञ्च समता चैव दमश्चैव न संशयः ।
अमात्सर्य्यं क्षमा चैव ह्रीस्तितिक्षानसूयता ॥
त्यागो ध्यानमथार्य्यत्वं धृतिश्च सततं दया ।
अहिंसा चैव राजेन्द्र सत्याकारास्त्रयोदश ॥"
इति महाभारते राजधर्म्मः ॥*॥
तस्यापालने दोषो यथा,—
"कृत्वा शपथरूपञ्च सत्यं यस्तु न पालयेत् ।
स कृतघ्नः कालसूत्रे वसेद्देवचतुर्युगम् ॥
सप्तजन्मसु काकश्च सप्तजन्मसु पेचकः ।
ततः शूद्रो महाव्याधौ जन्मसप्त ततः शुचिः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४८ अध्यायः ॥*॥
अपि च ।
"सत्येन लोकं जयति सत्यन्तु परमं तपः ।
यथाभूतप्रवादन्तु सत्यमाहुर्म्मनीषिणः ॥"
इति कौर्म्मेउपरिविभागे १४ अध्यायः ॥*॥
तस्य प्रशंसा यथा,—
"सत्यमायास्यति हरिः सत्यं निष्कपटं वद ।
वद तत् स्वभयं त्यक्त्वा सत्यं ब्रूहि सुसंसदि ॥
वरं कूपशताद्वापी वरं वापीशतात् क्रतुः ।
वरं क्रतुशतात् पुत्त्रः सत्यं पुत्त्रशतात् किल ॥
नहि सत्यात् परो धर्म्मो नानृतात् पातकं परम् ।
नहि मातुः परो बन्धुर्न गुरुर्म्मन्त्रदात् परः ॥"
इति ब्रह्मवैवर्त्ते जन्मखण्डे ८५ अध्यायः ॥*॥
अपि च ।
"तस्मात् सत्यं परं ब्रह्म सत्यमेव परं तपः ।
सत्यमेव परो यज्ञः सत्यमेव परं श्रुतम् ॥
सत्यं वेदेषु जागर्त्ति सत्यञ्च परमं पदम् ।
कीर्त्तिर्यशश्च पुण्यञ्च पितृदेवर्षिपूजनम् ॥
आद्यो विधिश्च विद्या च सर्व्वं सत्ये प्रतिष्ठितम् ।
सत्यं यज्ञस्तथा वेदा मन्त्रा देवाः सरस्वती ॥
व्रतचर्य्या तथा सत्यं ओङ्कारः सत्यमेव च ।
सत्येन वायुरभ्येति सत्येन तपते रविः ॥
सत्येनाग्निर्दहेन्नित्यं स्वर्गं सत्येन गच्छति ।
सत्येन चापः क्षिपति पर्जन्यो धरणीतले ॥
परेण सर्व्वदेवानां सर्व्वतीर्थावगाहनम् ।
सत्यस्य वचनाल्लोके सर्व्वमाप्नोत्यसंशयम् ॥
अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥
सत्येन देवाः प्रीयन्ते पितर ऋषयस्तथा ।
मनुष्याः सिद्धगन्धर्व्वाः सत्यात् सिद्धिमितो गताः ॥
अगाधे विपुले शुद्धे सत्यतीर्थे शुचिह्रदे ।
स्नातव्यं मनसा युक्तैः स्नानं तत् परमं स्मृतम् ॥
आत्मार्थे वा परार्थे वा पुत्त्रार्थे वापि मानवाः ।
अनृतं ये न भाषन्ते ते बुधाः स्वर्गगामिनः ॥
तस्मात् सत्यकृतं पश्य तदनन्तफलं भवेत् ॥"
इति वह्निपुराणे दानावस्थानिर्णयनामाध्यायः ॥
अपि च ।
"तड़ागशतदानेन यत् पुण्यं लभते नरः ।
ततोऽधिकञ्च लभते वापीदानेन निश्चितम् ॥
दशवापीप्रदानेन यत् फलं लभते नरः ।
ततोऽधिकञ्च लभते पुण्यं कन्याप्रदानतः ॥
दशकन्याप्रदानेन यत् फलं लभते नरः ।
ततोऽधिकञ्च लभते यज्ञकेन नराधिपः ॥
शतयज्ञेन लभते यत् पुण्यं पुण्यकृज्जनः ।
ततोऽधिकञ्च लभते पुत्त्रास्यदर्शनेन च ॥
दर्शने शतपुत्त्राणां यत् पुण्यं लभते नरः ।
तत् पुण्यं लभते नूनं पुण्यवान् सत्यपालनात् ॥
नहि सत्यात् परो धर्म्मो नानृतात् पातकं नरः ।
नहि गङ्गासमं तीर्थं न देवः केशवात् परः ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥*॥
अन्यच्च ।
"सत्यमूलं जगत् सर्व्वं सर्व्वं सत्ये प्रतिष्ठितम् ।
सिद्धं लभन्ते सत्येन ऋषयो वेदपारगाः ॥
सत्येन दीयते कन्या सत्यं जल्पन्ति ब्राह्मणाः ।
सत्यं वदन्ति राजानः सत्येन वसुधा धृता ॥
सत्येन गम्यते स्वर्गं मोक्षं सत्येन प्राप्यते ।
सूर्य्यस्तपति सत्येन सोमः सत्येन राजते ॥
यमः सत्येन हरति सत्येनेन्द्रो विराजते ।
वरुणश्च कुबेरश्च तौ च सत्ये प्रतिष्ठितौ ॥
तत् सत्यं मम नश्येत यद्यहं नागमे पुनः ॥"
इति वाराहे मथुरामाहात्म्ये पञ्चकतीर्थप्रभावकथननामाध्यायः ॥*॥ अन्यच्च ।
"सत्यं शम्येव चास्तिक्यं तथा चेन्द्रियनिग्रहः ।
देवताभ्यर्च्चनं पूजा ब्राह्मणानां विशेषतः ॥
सत्यं भूतहितं वाक्यमस्तेयं स्वागतम्परम् ।
नियमाः पञ्च सत्याख्या बाह्यमाभ्यन्तरं द्विधा ॥"
इति गारुड़े ४९ अध्यायः ॥*॥
अपि च ।
"धर्म्मा धर्म्मेण ते सत्या येऽधर्म्मेण गतश्रियः ।
सत्यशौचं मनःशौचं शौचमिन्द्रियनिग्रहः ॥
सर्व्वभूतदया शौचं जलशौचञ्च पञ्चमम् ।
यस्य सत्यञ्च शौचञ्च तस्य स्वर्गो न दुर्लभः ॥
सत्यं हि वचनं यस्य सोऽश्वमेधाद्विशिष्यते ॥"
इति गारुड़े ११३ अध्यायः ॥*॥
अपि च ।
"न सा सभा यत्र न सन्ति वृद्धा
वृद्धा न ते ये न वदन्ति धर्म्मम् ।
नासौ धर्म्मो यत्र नो सत्यमस्ति
नो तत् सत्यं यच्छलेनानुविद्धम् ॥
ब्राह्मणोऽपि मनुष्याणामादित्यश्चैव तेजसाम् ।
शिरोऽपि सर्व्वगात्राणां व्रतानां सत्यमुत्तमम् ॥"
इति गारुड़े ११५ अध्यायः ॥
ब्रह्म । यथा । यः सर्व्वज्ञः सर्व्ववित् यस्य ज्ञानमयं तपः सर्व्वस्य वशी सर्व्वस्येशानः यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः सोऽकामयत बहुस्यां स ईक्षत तत्तेजोऽसृजत् सत्यं ज्ञानमनन्तं ब्रह्म इत्याद्याः । इति श्रीभागवतदशमस्कन्धीय ८७ अध्यायीयद्वतीयश्लोकटीकायां श्रीधरस्वामी ॥*॥ अपि च ।
"अहमात्मा परं ब्रह्म सत्यं ज्ञानमनन्तकम् ।
विज्ञानमानन्दो ब्रह्म सत्तत्त्वमसि केवलम् ॥
नित्यं शुद्धं बुद्धियुक्तं सत्यमानन्दमद्वयम् ।
योऽसावादित्यपुरुषः सोऽसावहमखण्डितः ।
इति ध्यायन् विमुच्येत ब्रह्मणो भवबन्धनात् ॥"
इति गारुड़े ४९ अध्यायः ॥
तद्वैदिकपर्य्यायः । बट् १ श्रत् २ सत्या ३ अद्धा ४ इत्था ५ ऋतम् ६ । इति षट् सत्यनामानि । इति वेदनिघण्टौ । ३ । १० ॥
सत्यं, [म्] व्य, प्रश्नः । स्वीकारः । इति-रत्नावली ॥
सत्यः, पुं,(सते हितः । सत् + यत् ।) श्रीरामः । यथा,—
"कौशल्यानन्दनः श्रीशः सत्यो दशमुखान्तकः ॥"
इति शब्दरत्नावली ॥
विष्णुः । यथा,—
"औत्तमेऽप्यन्तरे विष्णुः सत्यैः सह सधोत्तमैः ।
सत्यायामभवत् सत्यः सत्यरूपो जनार्द्दनः ॥"
इति कौर्म्मे ४८ अध्यायः ॥*॥
अन्यच्च ।
"सत्यव्रतं सत्यपरं त्रिसत्यं
सत्यस्य योनिं निहितञ्च सत्ये ।
सत्यस्य सत्यमृतसत्यनेत्रं
सत्यात्मकं त्वां शरणं प्रपन्नाः ॥"
इति श्रीभागवते १० स्कन्धे २ अध्यायः ॥*॥